**18b** ◦न्माघे ] **A**, ◦न्मध्यं R **18c** सुकण्ठं ] $A_3A_4$, कन्धरं R, सुकश्चं $A_7$ • सन्धिवच्चै◦ ] **A**, सन्धयश्चै◦ R **19a** सुबाहुत्वं ] **A**, शुभाङ्गत्वं R **19b** चास्याः ] R, चास्य **A** **19c** त्रिवलिमध्यत्वं ] $A_3$, च त्रिवलीमध्यं R, त्रिवलिमध्यस्त्वं $A_4A_7$ **19d** तनुमध्यत्वमेव ] **A**, सुहनुत्वमथापि R **19e** सुश्लिष्ट◦ ] **A**, स्वङ्गुष्ठ◦ R **19f** ◦राजी च ] conj., ◦राजी +मनोरमा+ सु◦ R (unmetrical), ◦राजीव **A** **20c** ज्यैष्ठे ] $RA_3A_7$, ज्येष्ठे $A_4$ • मासि वरोरुत्वं ] R, मूले वरोरुत्वं{◦द्धं $A_3$} $A_3A_4$, ज्येष्ठत्वमापन्नं $A_7$ **20d** नागनासोरुता ] em., नागनागोरुता R, नागनाशोवता $A_3A_4$, उरसः शोभनन् $A_7$ **20e** सुगूढगुल्फता ] $A_3$, स्फीतत्वङ्गुल्फता R, सुगू{◦गु◦ $A_7$}ढगुल्मता $A_4A_7$ **21a** श्रेष्ठे ] **A**, स्वोष्ठौ R **21d** कार्त्तिके कलभाषिता ] **A**, रोमराजी मनोरमा R (cf. 19f) **22a** संवत्सरं ] $A_3A_7$, संव्वत्सरं R, संवत्सरे $A_4$ **22c** मिथुनं कृत्वा ] **A**, हृत्वा R (unmetrical) **22d** समाहिता ] $RA_3$, समाहिताः $A_4A_7$ **22f** मृन्मये ] $A_4A_7$, मृण्मये $RA_3$ • शुभम् ] $RA_7$, शुभे $A_3A_4$ **23b** तु ] **A**, च R **23d** रसाश्च ] $RA_3A_4A_7^{ac}$?, रसा(स्तु) $A_7^{pc}$ • शुभाः ] **A**, शुभा R **24a** अञ्जनीं ] $RA_3A_4$, अञ्जलीं $A_7$ • सशलाकां च ] R, ससलाकं च $A_3$, सशलाकं च $A_4$, ससनाकञ्च $A_7$ **24b** फलिकां ] **A**, फणिकां R • ◦नोपमाम् ] R, ◦नोपमम् **A** **24cd** ] om. $A_7$ **24c** कूर्चानलक्त◦ ] conj., कुर्व्वन्नलक्त◦ R, कूर्चपादश◦ $A_3A_4$ **24d** तुत्थं ] R, खड्गं $A_3A_4$ **25a** सुगन्ध◦ ] R, सस्वर्ण◦ $A_3A_4$, सुस्वर्ग्ग◦ $A_7$ • ◦चूर्णपूर्णं च ] R, ◦चूर्णपूर्ण⟨⏑̲⟩ $A_7$ (unmetrical), ◦पूर्णचूर्णं{◦र्ण◦ $A_4$}ता $A_3A_4$ **25b** सुलक्षणम् ] $RA_7$, सलक्षणम् $A_3A_4$ **25c** सिद्धार्थकांस्ति◦ ] **A**, सिद्धार्थकं ति◦ R **25d** कृत्वा ] R, कूर्च◦ $A_3A_4$, कूर्श्च◦ $A_7$

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

भक्षांश्च विविधाकारानैक्षवांश्च सुपूजितान्।
गन्धान्सुमनसश्चैव वस्त्रयुग्मं नवं द्वयम्॥ २६॥
आसनं च चतुःशाखं त्रिरात्रोपोषिता सती।
कार्त्तिक्यामुदिते हीन्दावेनं दद्यात्सदक्षिणम्॥ २७॥
सुवर्णं रजतं चैव किञ्चिदेवात्र दापयेत्।
ततस्तया सुचीर्णं तु व्रतं भवति नान्यथा॥ २८॥
ततः सुरूपतां लब्ध्वा पतिमाप्नोति शोभनम्।
देवरूपं महासत्त्वमिदमन्यच्छृणुष्व च॥ २९॥
अनग्निपक्कं या नारी कुरुते व्रतमुत्तमम्।
न सा दुःखमवाप्नोति व्रतेनानेन शोभने॥ ३०॥
सिंहव्रतं तु या नारी चरेदेव परायणा।
तस्या वश्यो भवेद्भर्ता सिंहस्कन्धो महाबलः॥ ३१॥
यमव्रतं तु या नारी कुरुते सुसमाहिता।
यमं सा हि न पश्येत न वै गच्छेत दुर्गतिम्॥ ३२॥
अर्चयेत्तत्र या सम्यक्कामं कृत्वा हृदि स्थितम्।
सदा नक्तं च भुञ्जाना सकृदन्नं यता पुनः।
सा पतिं शोभनं प्राप्य रम्यं च रमते सुखम्॥ ३३॥
प्रसृतं तण्डुलानां च या करोति सदाह्निकम्।
सा पतिं शोभनं प्राप्य बहून्पुत्रान्प्रजन्यते॥ ३४॥
व्रतान्येतानि सर्वाणि संवत्सरमशेषतः।
कुर्यात्तेषां तदन्ते च ब्राह्मणांस्तर्पयेद्बहून्॥ ३५॥

---

**26a** भक्षांश्च ] **A**, भक्ष्यांश्च R **26b** °नैक्षवांश्च ] **A**, °नक्षरांश्च R **26cd** ] R, सुमनसश्च वस्त्रयुग्मं प्रदद्यात्तु द्वयं नवं{नरं $A_3$, नरः $A_4$} **A**± **27a** °शाखं ] conj., °शालं R**A** **27cd** °मुदिते हीन्दावेनं ] conj., ⊔ चैनं R, °मुदिते हीन्दौ{हिंदौ $A_4$, हि⊔ $A_7^{ac}$} तेन **A** **27d** °त्सदक्षिणम् ] em., °त् सुदक्षिणम् R, °त्सदक्षिणां **A** **28a** सुवर्णं ] $RA_3A_7$, सुवर्ण° $A_4$ **28c** °स्तया ] $RA_3A_4$, °स्त्वया $A_7$ • सुचीर्णं तु ] R, सुसंपूर्णं **A** **29a** लब्ध्वा ] $RA_3A_4$, लब्धा $A_7$ **29b** पति° ] **A**, गति° R • शोभनम् ] **A**, शोभनाम् R **29c** °रूपं ] $RA_3$, °रूप° $A_4A_7$ **29d** °च्छृणुष्व च ] $A_4$, °त् प्रयुज्यते R, °त् शृष्व च $A_3$ (unmetrical), °त् शृणुस्व च $A_7$ **30a** अनग्निपक्कं या ] conj., इदं निःशङ्कया R, अनग्निपक्षं या **A** **30b** कुरुते ] $A_4A_7$, करोति R, कुते $A_3$ (unmetrical) **30d** शोभने ] R, शोभना **A** **31b** चरेदेव ] **A**, वधोदर° R **31c** वश्यो ] **A**, अवश्यं R (unmetrical) **31d** °स्कन्धो ] $RA_4A_7$, °कंधा $A_3$ **32c** सा हि ] R, हि सा $A_3A_4$, ⊔ हि ⟨(जा)⟩ $A_7$ (unmetrical) **32d** वै गच्छेत ] R, च गच्छेच्च **A** **33a** या ] **A**, सा R **33b** °क्कामं ] **A**, °क् यमं R **33c** नक्तं च ] **A**, नक्तन्तु R **33d** सकृदन्नं ] $A_3A_7^{pc}$, सुहृद्वर्ग° R, सकृद्दन्नं $A_4A_7^{ac}$ • यता ] R, च या **A** **33f** रम्यं च रमते ] R, वश्यं च कुरुते **A** **34a** प्रसृतं ] $RA_7^{pc}$?, प्रसूतं $A_3A_7^{ac}$, प्रभूतं $A_4$ **34c** पतिं शोभनं ] **A**, गतिं शोभनां R **34d** प्रजन्यते ] **A**, प्रजायते R

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

तर्पयित्वा च पिष्टेन कृत्वा तांस्तु व्रतान्पुनः ।
स्पर्शयेद्ब्राह्मणेभ्यस्तु ततस्तत्फलमश्नुते ॥ ३६ ॥
ब्राह्मणी तु व्रतानेतान्स्वस्मै पत्ये प्रदापयेत् ।
इतरेषां तु वर्णानां नियमो नास्ति कश्चन ॥ ३७ ॥
या तु संवत्सरं कुर्याद्भर्तुरुच्छेषभोजनम् ।
न सा योन्यन्तरं प्राप्य पतिमन्यं समश्नुते ॥ ३८ ॥
या तु कृत्वा हृदिस्थं वै पतिं पतिमनुव्रता ।
देववच्चार्चयेन्नित्यं किं तस्यास्तपसा पुनः ॥ ३९ ॥
तस्यामेव व्रता नित्यं तेन भावेन तोषिताः ।
सर्वान्कामान्प्रयच्छन्ति धनमायुर्यशो बलम् ॥ ४० ॥
अष्टमीं चन्द्रकल्पं या चरते देवरूपिणम् ।
सा तु सौम्यमवाप्नोति पतिं सर्वगुणैर्युतम् ॥ ४१ ॥
एतान्येव व्रतानीह मासिकानि शुचिस्मिते ।
चीर्णानि भोगं पश्यन्ति द्वादशाहस्य कर्मणः ॥ ४२ ॥
मासि भाद्रपदे या तु कालरात्रिमुपासते ।
कालरात्रं न सा पश्येद्विमुच्येत † समा सती † ॥ ४३ ॥
वर्षाव्रतं तु या कुर्यात्प्रथमे वृष्टिसर्जने ।
सा वृष्टिरिव लोकस्य भर्तुर्भवति वै प्रिया ॥ ४४ ॥
बह्वपत्यव्रतं या तु चरते मासमन्ततः ।
पुत्रपौत्रवृता सा तु जायते दुःखवर्जिता ॥ ४५ ॥
सर्वेषामेव धर्माणां कार्यो धर्मो न कश्चन ।
श्रेष्ठः पतिव्रतादन्यः सत्यमेतद्ब्रवीमि ते ॥ ४६ ॥
एष धर्मः समाख्यातो नारीणां सुरपूजितः ।
आचरस्व महाभागे यथाशक्त्या सुनिश्चितम् ॥ ४७ ॥
शतरूपा प्रणम्यैव तथैव पुनरेव च ।
आचचार तदा धर्मं ततः सा शुभलक्षणा ॥ ४८ ॥
– – – – – – – –  – – – – – – – – ।
चिन्तयित्वा तदात्मानं पुनरेवाभवत्स्थिता ॥ ४९ ॥

**36b** तांस्तु व्रतान्पुनः ] R, तान् व्रतकाम्यया **A** **36c** स्पर्शयेद्ब्रा° ] **A**, सा न्याय्यं ब्रा° R • °ह्म-णेभ्यस्तु ] $A_4A_7$, °ह्मेणेभ्यस्तु R, °ह्मणोभ्यस्तु $A_3$ **36d** ततस्तत्फलमश्नुते ] **A**, तत्तत्फलमवाप्नु{(°श्नु°) $R^{ac}$}ते R **37b** °न्स्वस्मै ] R, °न् यस्मै $A_3A_4A_7^{pc}$, °न् ⊔ $A_7^{ac}$ • पत्ये ] $RA_7$, यत्ये $A_3$, पत्यै $A_4$ **37c** इतरेषां तु वर्णानां ] **A**, कुत एषान्तु दानानि R **38b** °रुच्छेष° ] R, °रुच्छ्रेय° $A_3A_7$, °रुच्छिष्ट° $A_4$ **38c** न ] $RA_3A_7$, om. $A_4$ (unmetrical) • योन्यन्तरं ] **A**, पत्यन्तरं R **39c** देववच्चा° ] conj., देवरञ्चा° R, देवताभ्य° **A** **39d** °स्तपसा ] **A**, °स्तपसः R **40–col.** ] om. **A** **40a** तस्यामेव व्रता ] conj., तस्थावेव च सा R **40b** तोषिताः ] em., तोषिता R **41a** अष्टमीं ] em., अष्टमी R **41b** °रूपिणम् ] conj., °रूपिणीम् R **42d** द्वादशाहस्य ] conj., द्वादशन्तस्य R **44a** कुर्यात् ] em., कुर्य्या R **49ab** ] Loss of two or more pādas conjectured, om. R

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

तामिन्दुबिम्बाननतेजसं शिवामभासत व्याकुलमायताक्ष्यः।
निशामिव क्षीणदिवाकरग्रहां निरीक्ष्य सख्यः सुचिरेण विस्मिताः॥ ५०॥

इति स्कन्दपुराणे द्वादशोत्तरशते ऽध्याये स्त्रीव्रतम्॥ ११२-१॥

---

**50ab** शिवामभासत ] conj., शिवा सभाशत R **50b** °मायताक्ष्यः ] em., °मायताक्षाम् R **Col.** इति स्कन्दपुराणे रेवाखण्डे ऽध्यायः R

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

## द्वादशोत्तरशते ऽध्याये देवीशोकपरिहारः ।

सनत्कुमार उवाच ।
तां तथा पतिशोकेन चिन्तयन्तीं सुदुःखिताम् ।
अग्निकन्या महासत्त्वा मालिनी तामुवाच ह॥ १॥
मालिन्युवाच ।
मा शोके मन आधत्स्व हिमवत्तनये ऽव्यये ।
आगमिष्यति ते भर्ता नचिरादेव यज्ञहा॥ २॥
सो ऽपि नूनं महासत्त्वो विरहात्तव शोभने ।
भूयस्तरेण शोकेन बाध्यते नात्र संशयः ।
न हि ते स प्रियो देवि धृतिं लभति कर्हिचित्॥ ३॥
प्रभावत्युवाच ।
यथेह मालिनी त्वाह एवमेव न संशयः ।
मा त्वं शोके न आधत्स्व सख्य एताः सुमध्यमे॥ ४॥
एता हि तव दुःखेन द्विगुणं दुःखिताः शुभे ।
लोकाश्च दुःखिता व्यक्तं तव शोकेन सुप्रभे॥ ५॥
त्वं हि धारयसे लोकांस्त्वया दत्तं ‒ ‒ प्रभो ।
दुःखेन दुःखितान्मा त्वं दुःखेन समयोजय॥ ६॥
देव्युवाच ।
अयं भृङ्गिरिटिर्नन्दी ईश्वरस्य सदा प्रियः ।
एनं दृष्ट्वा हि शोकेषु मा सीदध्वं मया पुनः॥ ७॥
सनत्कुमार उवाच ।
ततो भृङ्गिरिटिर्नन्दी निश्चक्राम प्रतापवान् ।
तस्माद्गृहान्महासत्त्वः पुर एवाभवत्स्थितः ।
गम्यमानाभिचक्राम सखीभिः सा सुखावहा॥ ८॥
मालिन्युवाच ।
एष वृक्षो बहुफलो ऽण्डजैश्च बहुभिर्वृतः ।
पश्यैनं गणपैर्दिव्यैर्यथा रुद्रं समावृतम्॥ ९॥

---

Only manuscript R is available for this part: R f. 190r–191r

---

**1d** मालिनी ] em., मानिनी R **2** मालिन्यु° ] em., मानिन्यु° R **2d** यज्ञहा ] em., ⟨ज⟩यज्वहा R **3b** विरहात्तव ] em., विरहातुर R **4a** मालिनी ] em., मानिनी R **5c** लोकाश्च ] conj., लोकस्य R **5d** शोकेन ] conj., लोकेन R **6b** ‒ ‒ ] conj., om. R (unmetrical) **6c** दुःखितान् ] conj., दुःखिता R **7a** भृङ्गिरिटि° ] em., भृङ्गरटि° R **7b** ईश्वरस्य ] conj., चेश्वरस्य R **7c** एनं ] conj., एवं R • शोकेषु ] conj., लोकेषु R **7d** सीदध्वं ] conj., सीद त्वं R **8a** भृङ्गिरिटि° ] em., भृङ्गरिटि° R **8b** निश्चक्राम ] em., निश्चंक्राम R **9** मालिन्यु° ] em., मानिन्यु° R

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

अयं सुपुष्पः सुरसिद्धचारणैर्निषेवितो देवपतिर्यथाभवत्।
तथा खगैर्मन्दरसानुगोचरैर्निषेव्यते देवि च सौख्यदः सदा॥ १०॥
अयं तथान्यः सुरसिद्धवन्दितः सुपुष्पितः स्तूयति मागधैरिव।
खगैः खगीभिश्च त्रिलोकवन्दितो यथामरेशो मुनिभिः पुरन्दरः॥ ११॥
अयं च सम्यक्सुनवेन्दुतोषितो यथैव कामी वदनैः स्वयोषिताम्।
† ययौ † तथान्यः खगसत्तमः शुभे पपौ तरूणां कुसुमासवं शुभम्॥ १२॥
इमं च चारूज्ज्वलचित्रलक्षणं खगं प्रवर्तन्तमुमे निरीक्षय।
खगीसहायं रुचिराब्जलोचनं यथैव रुद्रं सहितं त्वया उमे॥ १३॥
इमं च मत्तं कुसुमावृतं सखि खगेश्वरं भूतपतिं निशामय।
पुरेव सोमासवमत्तचेतसा मरुत्तयज्ञे पतितं पुरन्दरम्॥ १४॥
इमं सुधाशङ्खतुषारपाण्डरे तडागतीरे शिखिनं निशामय।
वितत्य पक्षावनिशं व्यवस्थितं यथैव युद्धे तुरगेण सादिनम्॥ १५॥
इमं तथान्यं वनमध्यगं शुभं द्युतिप्रभासं विटपैः समन्वितम्।
उमे प्रपश्येह यथाम्बुदात्यये सुरेन्द्रपूजाध्वजमेकमुच्छ्रितम्॥ १६॥
इदं † पुरेवे † पतिगीतभाषितं सहैव पत्न्या विभयं शुभानने।
यथैव रुद्रः सहितस्त्वयानघे – – – – – – – – – – – – ॥ १७॥
इयं च वल्ली बहुपुष्पशोभिता अवेष्टयत्पादपमेनमन्ततः।
यथैव मत्ता सुरताभिकाङ्क्षिणी समण्डना कामिनमन्यकामिनी॥ १८॥
अयं च वृक्षो हिमवत्सुते ऽव्यये शरीरजातेन तथा प्रबाध्यते।
यथैव देवः सुरनाथपूजितो महेश्वरस्त्वन्मदनेन सुव्रते॥ १९॥
सनत्कुमार उवाच।
एतच्छ्रुत्वा तु सा देवी प्रहस्य हिमवत्सुता।
उत्पलेन समाहत्य इदं वचनमब्रवीत्॥ २०॥
दुःखितामपि मामद्य मर्मस्वेवाह्वयः प्रिये।
न नाम स तु शोको ऽस्ति गच्छ त्वं नास्मि ते ऽव्यथा ॥ २१॥
तां तथावादिनीं सख्य ऊचुः सर्वाः सुमध्यमाः।
तव हास्यार्थमेतद्वै मालिन्या समुदाहृतम्॥ २२॥

---

**10b** देवपति॰ ] $R^{pc}$, वापति॰ $R^{ac}$ (unmetrical) **10c** ॰र्मन्दर॰ ] conj., ॰र्म्मन्द्र॰ R **10d** सौख्यदः ] conj., मोक्षदः R **11a** तथान्यः ] em., तथान्य॰ R (unmetrical) **11b** मागधै॰ ] conj., सागरै॰ R **12a** ॰क्सुनवेन्दु॰ ] conj., ॰क् सुनरेन्द्र॰ R **12b** वदनैः स्व॰ ] conj., वदनैश्च R **12c** तथान्यः ] conj., तथायं R • शुभे ] $R^{pc}$, ⟨खगे⟩शुभे R **13c** ॰लोचनं ] em., ॰लोचना R **13d** रुद्रं ] em., रुद्रः R • सहितं त्वया ] conj., सहिस्त्वया R (unmetrical) **14a** सखि ] conj., सखे R **14b** निशामय ] $R^{pc}$, निशायय $R^{ac}$ **14c** पुरेव ] conj., पुरे च R **16b** ॰प्रभासं ] conj., ॰प्रशामं R **17d** ] R has an insertion mark after pāda c, but no insertion i.m. **18b** ॰त्पादपमेन॰ ] $R^{pc}$, ॰त्पादप॰ $R^{ac}$ (unmetrical) • ॰मन्ततः ] $R^{ac}$, ॰मन्ततो $R^{pc}$ **19d** ॰स्त्वन्मदनेन ] conj., ॰स्तन्मदनेन R **21b** ॰यः प्रिये ] conj., ॰यस्त्वये R **21c** शोको ] conj., लोको R **21d** ऽव्यथा ] conj., यथा R **22d** मालिन्या ] conj., मानया R

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

जितात्मा अनया सर्वा हास्यभावेन शोभने।
हास्यं तवोत्पादयन्त्या साधु मालिनि साधुषु॥ २३॥
सनत्कुमार उवाच।
ततस्ताः पादचारेण हसन्त्यः कालिनन्दन।
अन्यदेशमनुप्राप्ताः सह शैलादिनाव्ययाः॥ २४॥
ताः स्वर्णलेखा इव शाणयुक्ता यथैव सौदामिनयः प्रकाशाः।
वनं समासाद्य विशोकशल्यं विभान्ति मेघेषु-र्-अतिप्रभावाः॥ २५॥

इति स्कन्दपुराणे द्वादशोत्तरशते ऽध्याये देवीशोकपरिहारः॥ ११२-२॥

---

**23a** जितात्मा ] conj., जिताम्बा R **23b** हास्य॰ ] conj., दास्य॰ R **23d** मालिनि ] em., मानिनि R **24d** शैलादिना॰ ] conj., सेनादिना॰ R **25a** ताः स्वर्ण॰ ] conj., तामुह्य॰ R • शाणयुक्ता ] conj., साभियुक्तां R **25c** ॰शल्यम् ] $R^{pc}$, ॰शल्याम् $R^{ac}$ **25d** विभान्ति ] em., विभाति R **Col.** इति स्कन्दपुराणे रेवाखण्डे ऽध्यायः R

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

## द्वादशोत्तरशते ऽध्याये सप्तर्षिसमागमः।

सनत्कुमार उवाच।
ततः शुभावती नाम मेरुकन्या सुमध्यमा।
उवाच हिमवत्पुत्रीं दर्शयन्ती शुभं वनम्॥ १॥
शुभावत्युवाच।
इदं पर्वतकन्ये त्वं पश्य केलिकलाशुभम्।
वनं सर्वर्तुसंपन्नं यथा विद्वत्सुभाषितम्॥ २॥
अयं प्रपातः सुमहान्पर्वतस्यास्य शोभते।
विदुषामर्थकृत्येषु यथा युक्तं प्रभाषितम्॥ ३॥
एष स्वर्णोपलो भाति गिरेः शिखर उत्तमः।
†यथा लक्षणविद्वांसं युक्तो यश्चेन्द्र इत्यपि†॥ ४॥
अयं च मणिमान्नित्यं शिलाग्रः प्रतिभास्वरः।
भाति उद्यन्निवादित्यः उदयस्थो महायुगे॥ ५॥
अयं वैदूर्यशिखर इन्द्रनीलतलोपलः।
भाति शर्वाणि †शुभ्राणि स्थलेश्वर† इवोपरि॥ ६॥
अयं गजोत्तमो मत्तः करेणुभिरपावृतः।
अप्सरोगणमध्यस्थो देवराडिव पर्वते॥ ७॥

---

Manuscripts available for this part: R f. 191r–193v; $A_3$ f. 114v–116r; $A_4$ f. 161v–164r; $A_7$ f. 162r–165r. This part ($SP_{RA}$ 112.3) corresponds to SP 112.73–115.

---

**1** सनत्कुमार उवाच ] om. **A** **1a** Before this Bh has 26 pādas (see SP 112.73–78) • ततः ] **RA**, तदा Bh (conj.) • शुभावती ] **A**Bh, सु{शु° $R^{ac}$}भारती R **1b** मेरु° ] **A**Bh, एक° R **1d** दर्शयन्ती ] $RA_4A_7$Bh (em.?), दर्शयन्तीं $A_3$ • शुभं वनम् ] $A_3$Bh, शुभावहम् R, शुभं बलं $A_4$, शुभां बलं $A_7$ **2** शुभावत्युवाच ] **A**, सु{शु° $R^{ac}$}भारत्युवाच R, om. Bh **2b** पश्य केलिकला° ] $A_3$Bh, सुसम्यक् फलिना R, पश्य केलीकला° $A_4A_7$ • °शुभम् ] $R^{pc}$**A**Bh, वनम् $R^{ac}$ **2c** वनं ] $RA_3$Bh, बलं $A_4A_7$ **2d** यथा विद्वत्सु° ] R, यथाधित्वं सु° $A_3A_4$Bh, यथाधि(ध्यं) सु° $A_7$ **3a** प्रपातः ] R, प्रसूते **A**Bh **3b** °न्पर्वतस्या° ] R, °न् सपर्वस्या° **A**Bh • शोभते ] $R^{pc}$?, शोभति $R^{ac}$, शोभने **A**Bh **3c** °मर्थकृत्येषु ] R, °मथ कृच्छ्रेषु **A**Bh **3d** प्रभाषितम् ] R, सुभाषितं **A**Bh **4a** एष स्वर्णोपलो ] R, तथा स्वर्णोत्पलो **A**, तथा स्वर्णोपलो Bh (em.?) **4cd** °विद्वांसं युक्तो यश्चेन्द्र इत्यपि ] R, °वद्विद्वान् प्रगीय{°त $A_7$} इव सामगः **A**Bh **5** ] om. R **5a** °मान्नित्यं ] $A_3A_4$Bh, °माणिक्यं $A_7$ **5b** शिलाग्रः ] conj., शिलेग्र° $A_3$, शिलोग्नि° $A_4A_7$, शैलाग्रः Bh (conj.) **5d** उदयस्थो ] conj., उभयस्तो **A**Bh **6a** वैदूर्य° ] $RA_3A_7$Bh, वैडूर्य° $A_4$ **6b** °तलोपलः ] em. Bh (silently), °तमोपमः R, तलो{°नो° $A_3$}त्पलः **A** **6c** भाति ] $R^{ac}A_4A_7$Bh (em.?), भान्ति $R^{pc}A_3$ • शर्वाणि ] em. Bh, सर्वाणि **RA** • शुभ्राणि ] $A_3A_4$, सुस्थायां R, सुभ्राणि $A_7$, विभ्राणः Bh (conj.) **6d** स्थलेश्वर ] **A**Bh, तवेहव R • इवोपरि ] conj., हवो ऽपरि R, हरोपरि **A**Bh **7a** गजोत्तमो मत्तः ] em., गजोत्तमोन्मत्तः R, मत्तो गजो मत्त° **A**, मत्तो गजो मत्तः Bh (em.?) **7b** °रपावृतः ] R, °रिवावृतः **A**Bh **7c–10b** ] om. **A**Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

अयं † गजो गजेनैव † सुमहान्पर्वतोत्तमः ।
इतो यान्तो दिवि † चमां † दिग्गजे च यथा सुरः ॥ ८ ॥
पश्यामश्चैव लप्स्यामः प्रदीपमिव संस्थितम् ।
अशोकं हिमवत्पुत्रि पल्लवैरुपशोभितम् ॥ ९ ॥
बालारुणनिभो ह्येष वायुनाभिपरिप्लुतः ।
कृत्वात्राञ्जलयः सुभ्रु पल्लवैः शिरसा नतः ॥ १० ॥
अहो ऽस्य रूपं पश्येमं वनराजियुतं शुभे ।
यौवराज्ये ऽभिषिक्तं वै जयन्तमिव चामरैः ॥ ११ ॥
पादपैरेव शर्वाणि पश्यैनं करपल्लवैः ।
मातुः समीपे नृत्यन्तं शिशुं प्रियमिवौरसम् ॥ १२ ॥
मन्ये प्रियावासमिमं देवताया वनस्य ह ।
अतीव दीप्यते शोभा नेदृशीं दृष्टवत्यहम् ॥ १३ ॥
सनत्कुमार उवाच ।
तस्यास्तद्वचनं श्रुत्वा शुभावत्या गिरेः सुता ।
निरीक्ष्य तं तरुं सम्यग्घिमवत्तनयाव्यया ।
मनसा चिन्तयामास पुत्रो ऽयं मम पादपः ॥ १४ ॥
आगते पुनरेवेह देवदेवे अधिष्ठिते ।
इमं तेनाभ्यनुज्ञाता ग्रहीष्ये पादपं सुतम् ॥ १५ ॥

---

**15** ≈ SP 112.81

---

**8c** यान्तो ] conj., यन्त्रा R **9b** प्रदीप॰ ] em., प्रदीप्य॰ R **9d** पल्लवै॰ ] em., पल्ववै॰ R **10a** बालारुण॰ ] conj., कालाञ्जन॰ R **10c** कृत्वात्राञ्जलयः ] conj., कृत्वा यत्राञ्जनी R, कृत्वाभ्यञ्जनयः A$_3$A$_4$Bh, कृत्वाभ्यञ्जलयः A$_7$ • सुभ्रु ] RA$_3$A$_4$Bh, शुभ्रू A$_7$ **10d** पल्लवैः ] **A**Bh, पल्ववैः R **11a** ऽस्य ] R**A**, सु॰ Bh (conj.) • पश्येमं ] A$_3$A$_7$Bh, पश्येम RA$_4$ **11b** वन॰ ] RA$_3$Bh, बल॰ A$_4$A$_7$ • ॰राजियुतं ] A$_3$A$_4$Bh, ॰राजीसुतं R, ॰राजिसुतं A$_7$ **11c** ऽभिषिक्तं ] RA$_4$A$_7$Bh (em.?), भिमिक्तं A$_3$ **11cd** वै जयन्तमिव चामरैः ] **A**Bh, मां वैजयन्तमिवापरैः R **12a** पादपैरेव ] conj., पल्ववैरिव R, पादपैरिव A$_3$A$_7$, पदपैरिव A$_4$, पादपं चैव Bh (conj.) • शर्वाणि ] em. Bh (silently), सर्वाणि R**A** **12b** पश्यैनं ] **A**Bh, पश्येम R • ॰पल्लवैः ] R$^{ac}$**A**Bh, ॰पल्ववैः R$^{pc}$ **12d** शिशुं ] R, पुत्रं **A**Bh **13a** प्रिया॰ ] RA$_3$A$_4$Bh, श्रिया॰ A$_7$ • ॰मिमं ] **A**Bh, ॰मिदं R **13b** वनस्य ह ] **A**Bh, धनस्य च R **13c** अतीव ] **A**Bh, इतीव R • दीप्यते ] RA$_4$A$_7$, दृश्यते A$_3$Bh • शोभा ] RA$_3$Bh, शोभां A$_4$A$_7$ **13d** नेदृशीं ] A$_3$A$_7$Bh, नेदृशी RA$_4$ **14c** निरीक्ष्य तं ] RA$_3$A$_7$, निरीक्षंतं A$_4$, निरैक्षिष्ट Bh (conj.) • तरुं ] **A**Bh, गुरुं R **14cd** सम्यग्घि॰ ] R**A**, बालं हि॰ Bh (conj.) **14d** After this Bh has 8 pādas (see SP 112.79–80ab) **14e** मनसा ] **A**Bh, सा त्वेवं R **14f** मम पादपः ] R, पादपो{॰पं A$_7$} मम **A**Bh • After this Bh has two pādas (see SP 112.80cd) **15ab** ] (**A**), om. R, भगवत्यागते ह्येनमनुज्ञाता स्वयंभुवा Bh (< S) **15b** ॰देवे अधिष्ठिते ] conj., ॰देवैरतिष्ठत A$_3$A$_4$, ॰देवै अधिष्ठिते A$_7$ **15cd** ] (R)(**A**), ग्रहीष्यामि प्रियं पुत्रं वालाशोकस्य पादपम् Bh (< S) **15c** इमं ] **A**, इयं R **15d** सुतम् ] R, शुभा A$_3$A$_4$, सुता A$_7$

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

ममैवायमपुत्राया भविता पादपोत्तमः ।
पुत्रः पुत्रवतां श्रेष्ठः पुत्रशोकविनाशनः ॥ १६ ॥
सनत्कुमार उवाच ।
सा विनिश्चित्य तु तदा पादपं प्रति शोभना ।
अन्यं देशं परिक्रम्य इमं तत्राभिपश्यत ॥ १७ ॥
शिखरं पर्वतेन्द्रस्य अपतद्व्यसनं विना ।
पादपाश्च विना वातमुन्मूलाः संबभूविरे ॥ १८ ॥
उल्काः पतन्ति चाकाशाद्ववौ वायुरशोभनः ।
अक्षि सद्यो ऽस्फुरद्देव्या दक्षिणं कालिनन्दन ॥ १९ ॥
तान्दृष्ट्वा विस्मितं देवी शैलादिमिदमब्रवीत् ।
सख्यश्च सर्वाः कालेय इदं वचनकोविदा ॥ २० ॥
देव्युवाच ।
प्रमत्तो भाति शैलश्च सर्वैस्तैर्वृक्षसंयुतः ।
भयं महदिदं मन्ये नैतदाकस्मिकं स्मृतम् ॥ २१ ॥
नाद्यानिमित्तमुत्पाता भवन्त्येते दुरासदाः ।
तथा कुरु यथा मे नो भयं यच्छन्त्यशोभनाः ॥ २२ ॥

---

**16a** ममैवा॰ ] **RA**, मम चा॰ Bh (conj.) • ॰मपुत्राया ] RBh (em.?), ॰मपुत्राय **A** **16b** भविता ] RBh (conj.?), भेजिता **A** **16c** पुत्रः पुत्रवतां ] RBh (conj.), पुत्र पुत्रवती॰ **A** **16cd** श्रेष्ठः पुत्रशोकवि॰ ] $A_7$, श्रेष्ठश्चाशोकः शोक॰ R, ॰श्रेष्ठ पुत्रशोकवि॰ $A_3A_4$, श्रेष्ठाः पुत्रशोकवि॰ Bh (em.?) **16d** ॰नाशनः ] $RA_7Bh$ (em.?), ॰नाशन $A_3A_4$ **17a** सा विनिश्चित्य तु ] **A**, सा विनिश्चित्य R (unmetrical), सैवं विनिश्चित्य Bh (conj.?) **17c** अन्यं ] **A**Bh, अन्यद् R • परिक्रम्य ] **A**Bh, परिभ्राम्य R **17d** इमं ] R, उमा **A**Bh **17d** तत्राभि॰ ] **RA**, तत्राभ्य॰ Bh (em.?) • After this Bh has four pādas (see SP 112.82) **18b** अपतद्व्यसनं ] conj. Bh, अपतत् स्वसनं R, अपश्यद्व्यसनं **A** **18cd** ॰तमुन्मूलाः ] $A_3Bh$, ॰तं समूला R, ॰तमुन्मूला $A_4$, ॰तमुन्मूनाः $A_7$ **18d** संबभूविरे ] $A_3A_4Bh$, उन्मुमूलिरे R, स बभूविरे $A_7$ **19ab** चाकाशाद्ववौ ] $A_3A_4A_7^{ac}$, चाकाशे ववौ R, चाकाशद्रुवौ $A_7^{pc}$, चाकाशाद्वाति Bh (conj.) **19b** ॰रशोभनः ] **A**Bh, ॰र्दुरासदः R **19c** अक्षि सद्यो ऽ॰ ] conj., दक्षिणश्चा॰ $R^{ac}$, अक्षिणगे $R^{pc}$ (unmetrical), अक्षि सव्यं $A_3A_4A_7^{pc}$?Bh, अक्षि स(द्य)ः $A_7^{ac}$ **19cd** ॰स्फुरद्देव्या दक्षिणं ] R, स्फुरच्चापि दिव्या तत् $A_3A_4$, स्फुरच्चापि देव्यास्तत् $A_7Bh$ (em.?) **20a** तान्दृष्ट्वा ] **A**, तं दृष्ट्वा R, तान् वीक्ष्य Bh (conj.) • विस्मितं ] $A_3A_4$, विकृतं R, विस्वितं $A_7$, विस्मिता Bh (em.?) **20b** शैलादिमि॰ ] $A_3A_4Bh$, दैत्यानामि॰ R, शैलादी{॰दि॰ $A_7^{ac}$}नि॰ $A_7$ **20cd** ] om. R **20c** सख्यश्च ] **A**, सखीश्च Bh (em.) • सर्वाः कालेय ] conj., सर्वकालेया **A**Bh **20d** ॰कोविदा ] **A**, ॰कोविदाः Bh (em.?) **21** देव्युवाच ] $RA_3A_7Bh$, देव उवाच $A_4$ **21ab** ] **A**, अप्रमेयो भवानस्तु शैलादे गणपैः सह R, प्रमत्तो भाति शैलोयं वृक्षैस्तैः सर्वतो युतः Bh (conj.?) **21c** मन्ये ] $R^{pc}$**A**Bh, जातं $R^{ac}$ **21d** स्मृतम् ] **A**Bh, शुभम् R **22a** नाद्यानि॰ ] conj., न ह्यनि॰ **RA** (unmetrical), न चानि॰ Bh (conj.) **22b** भवन्त्येते ] **A**Bh, दृश्यन्ते हि R **22c** यथा मे ] **A**Bh, यतात्मा R **22d** भयं यच्छन्त्य॰ ] **A**Bh, मान यच्छति R • ॰शोभनाः ] $A_3A_7Bh$, शोभन R, ॰शोभना $A_4$ • After this Bh conjectures two pādas reading ततो नन्दी प्रणम्याह देवदेवीं कृताञ्जलिः ।

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

नन्द्युवाच।
शिवा ह्येते महावीरा लोकपालोपमा इति।
कुतो भयं तव शुभे यस्या भर्ता वृषध्वजः॥ २३॥
यतः सर्वं जगत् † सर्वं दानवानामपश्यत †।
कुतो भयं भवानि त्वं मातासि त्रिदिवौकसाम्॥ २४॥
सनत्कुमार उवाच।
तस्यैवंवदतो व्यास देवीं विश्वस्य मातरम्।
अन्धको नाम दैत्येन्द्रः पातालान्मन्दरं ययौ॥ २५॥
स दैत्यानां शतेनैव वरिष्ठानां महासुरः।
आगतो मन्दरं दृष्टुं यथेन्द्रो नन्दनं वनम्॥ २६॥
प्रह्लादश्चानुह्लादश्च शिबिर्बाष्कलिरेव च।
कुण्डस्तुकुण्डो वातापी बलिर्बाणो विरोचनः॥ २७॥
इल्वलो नमुचिर्व्यंसो विप्रचित्तिर्महासुरः।
सुन्दो निसुन्दो नरको धेनुको ऽरिष्ट एव च॥ २८॥
मुरः कार्तस्वनश्चैव हस्ती दुर्योधनो मयः।
तारकस्तारकाक्षश्च विद्युन्माली प्रभाकरः॥ २९॥
हालाहलश्च कुम्भश्च शम्बरः कालशम्बरः।
धुन्धुस्तथेन्द्रदमनो हयग्रीवः शतोदरः॥ ३०॥

---

**25cd** ≈ SP 112.83ab

---

**23–24ab** ] om. **A**Bh  **24c** त्वं ] R, त्वां **A**Bh  **24d** मातासि त्रि॰ ] conj., यातासि त्रि॰ R, या त्वं माता **A**Bh  **25a** तस्यैवं॰ ] R$A_3A_4$Bh, तथैवं॰ $A_7$  • ॰वदतो ] **A**Bh, ॰गदतो R  **25b** विश्वस्य ] **A**Bh, विश्रम्य R  **25c** नाम दैत्येन्द्रः ] R**A**, पि तदा दैत्यः Bh (<S)  **25d** पातालान्मन्दरं ] **A**Bh, प्रपातान्मन्दिरं R  • After this Bh has four pādas (see SP 112.83c–f)  **26a** शतेनैव ] $A_4A_7$, शतेनापि R, मतेनैव $A_3$Bh  **26b** वरिष्ठानां ] **A**Bh, करिष्यामो R  • महासुरः ] $A_3A_7$Bh, न संशयः R, महासुर $A_4$  **26c** मन्दरं ] **A**Bh, मन्दिरं R  • दृष्टुं ] R$A_3$Bh, दृष्टुं $A_4A_7$  **26d** यथेन्द्रो नन्दनं वनम् ] $A_3A_4$Bh, यथा मन्दो महाबलः R, यथेन्द्रो नन्दनं बलं $A_7$  **27a** ॰श्चानुह्लादश्च ] **A**Bh, ॰श्चापि ये तत्र R  **27b** शिबिर्बाष्कलिरेव च ] em., मुनिना च ततो व्ययः R, शिबि{शिखिबि॰ $A_3$(unmetrical)}राक्षणिरेव च $A_3A_4$, शिबिबाक्षलिरेव च $A_7$, शिनिर्बाष्कलिरेव च Bh (conj.?)  **27c** कुण्डस्तुकुण्डो ] em., कुण्डन्तुकुण्डो R, कुण्डो भूकुण्डो{॰कुडो $A_4$} **A**, हुण्डस्तुहुण्डो Bh (conj.)  • वातापी ] **A**Bh, वातापिर् R  **28a** इल्वलो ] $A_3A_4$Bh, इह्ललो R, इ(ल्व)ना $A_7$  • ॰र्व्यंसो ] conj. Bh, ॰र्व्यास R$A_3$, ॰र्व्यासो $A_4$, ॰र्व्यासे $A_7$  **28cd** ] **A**Bh, स्कन्दो निकुम्भो राजेन्द्रः सर्व्वे दैत्यगणास्तथा R  **29ab** ] om. R  **29a** मुरः ] conj. Bh, सुरः **A**  **29c** ॰स्तारकाक्ष॰ ] R[pc]**A**Bh, ॰स्तारकाख्य॰ R[ac]  **29d** प्रभाकरः ] **A**Bh, तथैव च R  **30ab** ] om. R  **30a** हालाहल॰ ] $A_3A_7$Bh, हलाहल॰ $A_4$  **30b** शम्बरः ] $A_4$, संवरः $A_3A_7$Bh  • ॰शम्बरः ] $A_4$, ॰संवरः $A_3A_7$Bh  **30c** धुन्धु॰ ] **A**Bh, धेनु॰ R  **30cd** ॰नो हयग्रीवः शतोदरः ] $A_4A_7$Bh (em.?), ॰नः{॰नो R[ac]} शमनो बहुगणस्तथा R, ॰नो हयगीवः शतोदरः $A_3$  • After this R has two pādas reading हानो बाह्यशिराश्चैव सुप्रमत्तस्तथैव च। (cf. 30a?)

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

मेघनादः सिंहनादो दुन्दुभिः शतदुन्दुभिः ।
कालनेमिर्बको दण्डो विपाकः पाक एव च ॥ ३१ ॥
वृषपर्वा शतावर्तः पुलोमा शरभस्तथा ।
वलो गगनमूर्धा च सूचीलोमा महायशाः ॥ ३२ ॥
असिलोमा प्रलम्बश्च शम्भुर्देवान्तकस्तथा ।
महिषो भीमसेनश्च †वायुरादित्य एव च† ॥ ३३ ॥
आटिर्बकश्च वातश्च कुण्डलो मुण्ड एव च ।
साल्वो द्रुमश्च जम्भश्च महाकेतुश्च कामपः ॥ ३४ ॥
कपाली शोषणश्चैव हंसः †विश्वजयस्तथा ।
अर्धमत्तश्च वायुश्च कलिनः फल एव च ।
उल्कको बन्धकश्चैव† मधुः कैटभ एव च ॥ ३५ ॥
अन्ये महाबलाः शूरा असुरा देवकण्टकाः ।
अन्धकानुचरा व्यास मन्दरं समुपागताः ॥ ३६ ॥
ते शस्त्रवन्तो जितकाशिनश्च महाबलाधर्मपथस्थिताश्च ।
सर्वे च शूरा अनिवर्तिनश्च सहान्धका मन्दरगा बभूवुः ॥ ३७ ॥
सनत्कुमार उवाच ।
तद्गजानामिव कुलं मत्तानां कालिनन्दन ।
वर्षतामिव मेघानां सविषाणां सरीसृपाम् ॥ ३८ ॥

---

**31ab** ॰दो दुन्दुभिः शतदुन्दुभिः ] **A**Bh, ॰दः{॰दो $R^{ac}$} सा+युधा+श्च तथा पुनः R **31c–32b** ] om. R **31c** कालनेमिर्बको ] em. Bh (silently), कालनेमिः बको $A_3$, कालनेमिः ककोे $A_4$, कालनेस्ये{कानस्ये $A_7^{ac}$} ककोे $A_7$ **32b** ॰स्तथा ] $A_3A_7$Bh, ॰स्तदा $A_4$ **32c** वलो ] $RA_3$Bh (बलो in Bh), वालो $A_4$, बाणो $A_7$ **32d** सूचीलोमा ] em., शूरो लोको R, सूचिरोमा $A_3A_4$, शूचीलोमा $A_7$, सूचीरोमा Bh (em.?) • महायशाः ] **A**Bh, महादनः R **33a** प्रलम्ब॰ ] **A**Bh, प्रमत्त॰ R **33b** शम्भुर्देवान्तकस्तथा ] **A**Bh, निकुम्भः कुम्भसूदनः R **33c** महिषो ] **A**Bh, महीयो R **33d** वायुरादित्य ] R, वायुवादित्र **A**, वायुर्वादित्र Bh (em.?, in a note Bh suggests वायुरादित्य) **34a–35d** ] om. $A_3A_4$Bh, $A_7$ has this in the order of 35abcd and 34. **34a** आटिर्बकश्च ] em., चर्चिरूपश्च R, आढिर्बकश्च $A_7$ • वातश्च ] $A_7$, कुण्डश्च R **34b** मुण्ड ] R, मण्ड $A_7$ **34c** साल्वो ] conj., शालो R, शम्बो $A_7$ • जम्भश्च ] $A_7$, जन्तुश्च R **34d** महाकेतुश्च कामपः ] R, एकपादश्च दानवः $A_7$ **35b** विश्वजयस्तथा ] R, विश्वो विभाकरः $A_7$ **35cd** ] R, अहस्तमश्च बाणश्च विरूपाक्षो गजस्तथा $A_7$ **35e–36b** ] om. **A**Bh, instead, $A_7$ has four pādas reading धाता विधाता काव्यश्च महानरक एव च। कपाली शोषणश्चैव शाल्वः कपिल एव च। (cf. 35a) **36c** ॰कानुचरा व्यास ] **A**, ॰कानुश्च वात्या च R, ॰कानुचराप्येते Bh (conj.) **36d** मन्दरं समुपागताः ] **A**Bh, हयकर्ण्णस्तथैव च R **37ab** ॰काशिनश्च महाबला॰ ] R, ॰देवसंघा महानुभावा **A**Bh (unmetrical) **37b** ॰स्थिताश्च ] R, ॰च्युताश्च $A_3A_4$Bh, ॰श्च्युताश्च $A_7$ **37c** शूरा अ॰ ] $RA_3A_4$, सूरा अ॰ $A_7$, शूरा ह्य॰ Bh (conj.?) **37d** सहान्धका ] conj. Bh (silently), सन्नद्धका R, महान्धका **A** • मन्दरगा ] **A**Bh, मन्दिरगा R **38a** तद् ] em. Bh (silently), तं R**A** • गजानामिव कुलं ] **A**Bh, पश्यामीह बहुलं R **38d** सविषाणां ] $RA_4A_7$Bh (em.?), सरिषानां $A_3$

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

दर्पितानां वराहाणां बहूनामिव चोल्बणम्।
मन्दरे दानवकुलं तथा तत्प्रचचार ह॥ ३९॥
सो ऽन्धको विचरंस्तत्र सखीभिः सह पार्वतीम्।
अपश्यद्दानवः क्रूरः श्वपाको ब्राह्मणीमिव॥ ४०॥
स पश्यन्नेव कालेय हिरण्याक्षसुतस्तदा।
आविष्टः कलिना योगाद्दानवानामपश्यताम्॥ ४१॥
नियत्याथ कृतान्तेन मृत्युना मदनेन च।
कोपेनाथ दुरात्मासौ काले प्राप्ते सुरेतरः॥ ४२॥
अध्यासितस्तदा तैस्तु सर्वैर्लोकवशंकरैः।
लोकधात्रीं प्रति शुभामिदं वचनमब्रवीत्॥ ४३॥
अन्धक उवाच।
केयं सुमध्यमा तन्वी रूपेणाप्रतिमा शुभा।
नेदृशी दृष्टपूर्वा मे कदाचिदपि दानवाः।
दिवि वा भुवि वा सत्यं पश्यतैनां सुमध्यमाम्॥ ४४॥
इयं यदि न मे भार्या कस्याहं पतिरीश्वरः।
को वाहं किं च जीवामि सत्यमेतद्वचो मम॥ ४५॥

---

**40** ≈ SP 112.84

---

**39ab** °णां बहूनामिव चोल्बणम् ] conj., °णां शतानामिव चोल्बणम् R, °णा{°ना° $A_3$, °णां $A_4^{ac}$ $A_7$}माकुलामिव चोल्बणं{°ल्बनं $A_7$, °ज्वनं $A_4$} **A**, °णां महाकुलमिवोल्वणम् Bh (conj.?) **39c** मन्दरे ] $A_7$Bh (em.?), मन्दिरे R, मंदार° $A_3A_4$ **39d** तत्प्रचचार ह ] **A**Bh, तत्प्रहरणाय च R (unmetrical) **40b** सखीभिः ] R$A_3A_7$Bh, ऋषिभिः $A_4$ • सह पार्वतीम् ] R**A**, सहितां तदा Bh (< S) **40c** °द्दानवः क्रूरः ] R**A**, °द् देवदेवी तु Bh (< S, typo) **40d** श्वपाको ब्राह्मणी° ] $A_3A_4$, स काले ब्राह्मणी° R, स्वपाको ब्राह्मणी° $A_7$, वृकः सिंहवधू° Bh (< S) **41a** स पश्यन्नेव ] RBh (conj.?), अपश्यन्नेव **A** **41b** °स्तदा ] **A**Bh, °स्तथा R **41c** आविष्टः कलिना ] conj., अरिष्टः कलिना R, स्वविशन्त इवा° **A**, स्वपिसंत इवा° Bh (conj.?, Bh suggests अनिमेष इवा°) **41d** °द्दानवानामपश्यताम् ] conj., °द्दानवनामपश्यत R (unmetrical), °ददृश्यत दुरात्मवान् **A**Bh **42a** नियत्याथ ] $A_3$Bh, नियम्याथ R, निपत्त्याथ $A_4$, नियत्यप्र° $A_7$ **42b** °ना मदनेन ] RBh (conj.?), °ना दमनेन $A_3A_4$, °नाथ यमेन $A_7$ **42d** सुरेतरः ] **A**Bh, महामतिः R **43a** अध्यासितस्तदा तैस्तु ] **A**Bh, अथोषितां तदा तत्र R **43b** सर्वैर् ] R, सर्व° $A_3A_4$Bh, सर्वे $A_7$ **43cd** प्रति शुभामि° ] R, प्रति सो यमि° $A_3$Bh (unmetrical), प्रती सो यमि° $A_4$, प्रति सो थ इ° $A_7$ (unmetrical) **44a** तन्वी ] R$A_7$, तत्र $A_3A_4$, ह्यत्र Bh (conj.?) **44b** शुभा ] R$A_3A_4$Bh, भुवि $A_7$ **44c** दृष्टपूर्वा ] RBh (conj.?), पूर्वदृष्टा **A** **44e** दिवि वा ] R$A_4A_7$Bh (em.?), दिवि चा $A_3$ • वा सत्यं ] R$A_7$, चागत्य $A_3A_4$Bh **44f** पश्यतैनां ] **A**Bh, पश्याम्येनां R **45a** इयं यदि न मे ] R$A_7$, इयं यदि{°दी $A_4$} नाम $A_3A_4$, यदि नाम इयं Bh (conj.?) **45b** कस्याहं ] R, कस्येयं **A**Bh • °रीश्वरः ] **A**Bh, °रीदृशः R

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

यस्येयं युवती भार्या चारुचित्रायतेक्षणा।
स्वर्गवासेन किं तस्य सुभगस्य महात्मनः।
मिथ्याराज्यमिदं राज्यं यस्येयं मे न कामिनी॥ ४६॥
बहूनि स्त्रीसहस्राणि मम सन्ति शुभानि च।
तानि सर्वाणि दासीत्वे अस्यास्तुल्यानि दानवाः॥ ४७॥
सनत्कुमार उवाच।
तस्य तद्वचनं श्रुत्वा हिरण्यकशिपोः सुतः।
उवाचान्धकमाश्लिष्य बहुचित्रं च कालिज॥ ४८॥
प्रह्लाद उवाच।
इयं लोकस्य जननी हिमवत्तनयाव्यया।
उमेति लोके विख्याता तपोयोगबलान्विता॥ ४९॥
यस्य पुत्रो ऽभवद्ब्रह्मा प्राजापत्यं च यो ददौ।
वरेण यश्च पुत्रस्य पुत्रतां ब्रह्मणो गतः॥ ५०॥
अस्माकं देवतानां च यो वरांस्तोषितो ददौ।
आराध्यः सर्वलोकानां देवानां च महायशाः॥ ५१॥
इच्छया सर्वमाविश्य निमेषार्धेन संक्षिपेत्।
सृजेद्वापि ग्रसेद्वापि योगमास्थाय लोलुप॥ ५२॥
यस्याष्टतनुभिः सर्वं धार्यते जगदव्ययम्।
तस्य रुद्रस्य शर्वस्य पत्नीयं दानवेश्वर॥ ५३॥
इयमप्रतियोगित्वादपचारैः प्रमर्दितुम्।
शक्ता हीयं जगत्सर्वं क्षणेनैवासुरेश्वर॥ ५४॥

---

**49a–50b** ≈ SP 112.87a–88b **51ab** ≈ SP 112.88cd **53** ≈ SP 112.89c–90b **54cd** ≈ SP 112.90cd

---

**46a** यस्येयं ] $A_3A_4$Bh, पश्य मे R, यश्चेयं $A_7$ • युवती ] **A**Bh, सुदती R **46c** स्वर्गवासेन ] R$A_3$Bh, स्वर्गवासो न $A_4$, स्वर्गे वासो न $A_7$ **46e** ◦राज्य◦ ] $A_3A_7$Bh, ◦राह्य◦ R, ◦राज◦ $A_4$ **46ef** राज्यं यस्येयं मे न ] conj., यास्याम्यहं येन च R, गुह्यं यस्येयं येन{जन◦ $A_4$} **A**, गुह्यं यस्येयं मे न Bh (conj.?) **47a** स्त्री◦ ] R, च **A**Bh **47cd** दासीत्वे अस्यास्तुल्यानि दानवाः ] **A**Bh, दास्यामि महाकीर्त्ते महातपः R **48b** हिरण्यकशिपोः सुतः ] **A**Bh, प्रह्लादो वै महामतिः R **48d** च कालिज ] $A_4A_7^{pc}$Bh (em.?), कराणि च R, कानिज $A_3A_7^{ac}$ **49** प्रह्लाद उवाच ] R$A_3A_4$, प्रह्राद उवाच $A_7$, om. Bh **49a** Before this Bh has 8 pādas (see SP 112.85–86) **49b** ◦याव्यया ] **A**Bh, ◦या शुभा R **49c** लोके विख्याता ] R, लोकविख्याता **A**, जगति ख्यता Bh (< S, typo, unmetrical) **50b** प्राजापत्यं ] R**A**, प्रजापत्यं Bh (typo) • यो ] **A**Bh, या R **50c** यश्च ] **A**Bh, यस्य R **51b** यो वरांस्तोषितो ददौ ] **A**, या वरांस्तोषिता ददौ R, यो ददाति वराञ्छुभान् Bh (< S) **51c** आराध्यः ] **A**, आराध्या R, आरध्यः Bh (typo) **51d** देवानां च ] $A_3A_7$Bh, देवतानां R, देवाना च $A_4$ • After this Bh has four pādas (see SP 112.89) **52a** इच्छया सर्वमाविश्य ] R**A**, यः स्वेच्छया सर्वमिदं Bh (conj.) **52b** ◦षार्धेन ] $A_3A_7$Bh, ◦षार्द्धेण R, ◦षार्द्धं न $A_4$ **52c–56b** ] om. **A**Bh, instead Bh has 12 pādas with a speaker indication (see SP 112.90–92) **52c** सृजेद् ] em., मृजेद् R **52d** योग◦ ] conj., यास◦ R **53a** यस्याष्ट◦ ] conj., यस्यास्तु R • सर्वं ] em., सर्व्वं R

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

दग्धुं वाप्यथ हन्तुं वा क्षेप्तुं नरक एव वा।
नेह लभ्या त्वया देवी †स्थानादेव बहिर्यथा†॥ ५५॥
सनत्कुमार उवाच।
प्रह्लादवचनं श्रुत्वा व्याकुलस्य महात्मनः।
अदृश्याः समपद्यन्त ताः स्त्रियो लोकमातरः॥ ५६॥
अथ ते तासु नष्टासु मन्दरस्य शुभं वनम्।
पादचारेण संप्राप्ता बहुदृश्यसमावृतम्॥ ५७॥
बलाभिः कदलीषण्डैः प्रियङ्गुसातिमुक्तकैः।
चम्पकैर्बकुलैर्लोध्रैरशोकैर्नागकेसरैः॥ ५८॥
पुन्नागैस्तिलकैश्चैव देवदारुवनैरपि।
सरलैर्नारिकेलैश्च पद्मषण्डैश्च शोभितम्॥ ५९॥
गह्वरैश्च नितम्बैश्च गुहाभिर्निर्झरैरपि।
न तस्माद्रमणीयं हि पृथिव्यां विद्यते क्वचित्॥ ६०॥
तत्र ते विचरन्तस्तु एकस्मिन्निर्झरे स्थितान्।
सप्तर्षींस्तपसा शुद्धानपश्यन्त महामुनीन्॥ ६१॥
उपविष्टाञ्छिलापट्टे कथयन्तो महामुनीन्।
धर्मयुक्ताः कथाश्चित्रा धार्मिकाश्च सुखावहाः॥ ६२॥
तान्दृष्ट्वा ते ऽसुरास्तत्र अपृच्छन्त परस्परम्।
क इमे ऋषयो ह्यत्र किमर्थं चेह संगताः॥ ६३॥

**55ab** ≈ SP 112.91ab  **61** ≈ SP 112.94  **63** ≈ SP 112.95

**55c** लभ्या ] conj., सभ्या R  **56c** Before this Bh conjectures loss of two pādas.  **57a** तासु नष्टासु ] $A_3A_7$Bh, सुमहातेजा R, सुनष्टासु $A_4$ (unmetrical)  **57d** °दृश्यसमा° ] RBh (conj.?), °दृश्येदमा° **A**  **58a** बलाभिः ] $A_3A_4$Bh, धाराभिः $R^{pc}$, वाराभिः $R^{ac}$, वराभिः $A_7$ • कदली° ] $RA_4A_7$, कलनी° $A_3Bh^{ac}$, कलमी° $Bh^{pc}$ (conj.?) • °षण्डैः ] $A_3A_7$Bh, °खण्डैः $RA_4$  **58b** प्रियङ्गुसातिमुक्तकैः ] em., प्रियङ्गुसातिमुक्तिकैः **A**, प्रियङ्ग्वा चातिमुक्तकै R, सातिमुक्तप्रियंगुभिः Bh (conj.?)  **58c** °र्बकुलै° ] **A**Bh, °र्ब्बहुभि° R  **58d** °केसरैः ] em., °केशरैः R, °साह्वयैः **A**Bh  **59c** सरलै° ] **A**Bh, शरलै° R  **59d** °षण्डैश्च ] $A_7$Bh (conj.?), °खण्डैः सु° R, °खंडैश्च $A_3$, °मुंडैश्च $A_4$  **60a** गह्वरैश्च ] $A_3A_4$Bh, शङ्करैश्च R, गन्धर्वैश्च $A_7$  **60b** °र्निर्झरै° ] $A_3A_7$Bh, °र्निर्गमै° R, °र्निर्डरै° $A_4$  **60c** °यं हि ] **A**Bh, °यन्तु R  **60d** पृथिव्यां ] $RA_4$Bh (conj.?), पृथिवी $A_3A_7$ • After this Bh has four pādas (see SP 112.93)  **61a** °स्तु ] **A**Bh, °श्च R  **61b** °न्निर्झरे स्थितान् ] **A**Bh, °न्वासरे स्थिताः R  **61c** सप्तर्षींस्तपसा शुद्धा° ] $RA_3A_7$, सप्तर्षिंस्तपसा शुद्धा° $A_4$, सिद्धानपश्यन् सप्तर्षी° Bh (conj., cf. S)  **61d** °नपश्यन्त महामुनीन् ] $A_3A_7$, °न् देवानामपि मानवाः R, °नापश्यन्तं महामुनीन् $A_4$, °न् योगयुक्तान् महामुनीन् Bh (< S)  **62ab** ] om. R  **62b** कथयन्तो महामुनीन् ] $A_7$, कथयंस्ते महामुनीन् $A_3A_4$, मिथः कथयतः कथाः Bh (conj.)  **62c** °युक्ताः कथाश्चित्रा ] $RA_3A_7$, °युक्ता कथाश्चित्रा $A_4$, °युक्ताश्च चित्रार्था Bh (conj.)  **62d** धार्मिकाश्च ] R, धार्मिकाः स° **A**, मार्मिकाः सु° Bh (typo, em.?)  **63ab** ] $RA_3(A_4)A_7$, तान्दृष्ट्वा सो न्धको पृच्छत् प्रह्लादमसुरोत्तमम् Bh (< S) • °स्तत्र अपृच्छन्त ] $RA_3A_7$, °स्त अपृच्छंतः $A_4$ (unmetrical)  **63c** क इमे ] **A**Bh, इह मे R • ह्यत्र ] Bh (< $S_1$), व्यास RA  **63d** किमर्थं चेह ] RBh (< S), किं वा चेह च **A**

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

तानुवाच तदा धीमानसुरान्देवकण्टकान् ।
हिरण्यकशिपोः पुत्रो बुद्धा मध्ये समास्थितः॥ ६४॥
प्रह्लाद उवाच ।
एते चात्र महात्मानो मुनयः सप्त संगताः ।
भृगुरत्रिर्मरीचिश्च विश्वामित्रो ऽङ्गिरास्तथा॥ ६५॥
भरद्वाजो वसिष्ठश्च सप्तैते ऋषयः शुभाः ।
इहागता महात्मानस्तपसा दग्धकिल्बिषाः॥ ६६॥
नैषां निष्कारणं मन्ये मन्दरागमनं प्रति ।
ततो वयमिहैकान्ते स्थिताः सर्वे ऽसुरेश्वराः॥ ६७॥
जानीमः किमिमे कार्यमिह कुर्वन्ति साधवः ।
एते वै निभृता भूत्वा तूष्णीं कृत्वा महाबलाः॥ ६८॥
सनत्कुमार उवाच ।
ततस्ते समयं कृत्वा स्थिता असुरपुंगवाः ।
यो ऽस्माकं तु वदेत्किंचिद्वध्यो नः स भवेदिति॥ ६९॥
तत्र तेषु स्थितेष्वेवमसुरेषु दुरात्मसु ।
ऋषयस्ते तपोयुक्ता इदमूचुः परस्परम्॥ ७०॥
अयं देशो ह्यशुद्धो ऽद्य गच्छामो वयमन्यतः ।
भवान्यपि गतान्यत्र असुराणां भयार्दिता॥ ७१॥

---

**65–66ab** ≈ SP 112.96–97ab **67** ≈ SP 112.97c–98b **70–71ab** ≈ SP 112.99–100ab

---

**64a** तानु॰ ] **RA**, तमु॰ Bh (conj.) **64b** ॰नसुरान् ] RA$_4$A$_7$, ॰न् सुरान् A$_3$ (unmetrical), ॰नसुरो Bh (conj.) • ॰कण्टकान् ] **RA**, ॰कण्टकम् Bh (conj.) **64d** बुद्धा मध्ये ] A$_7$, मध्ये तत्र R, बुद्धा मध्य॰ A$_3$A$_4$, बुद्धा मध्यं Bh (em.?) **65** प्रह्लाद ] RBh (< S), सनत्कुमार **A** **65ab** चात्र महात्मानो मुनयः ] **RA**, न्धक महात्मान ऋषयस् Bh (< S) **65d** ऽङ्गिरास्तथा ] **A**Bh, ऽथ काश्यपः R **66a** वसिष्ठश्च ] A$_3$A$_4$Bh, वशिष्ठ R (unmetrical), वशिष्ठश्च A$_7$ **66b** सप्तैते ऋषयः शुभाः ] **A**, ऋषयश्च तथा शुभाः R, योगसिद्धास्तपोधनाः Bh (< S) **66d** दग्ध॰ ] **A**Bh, हत॰ R **67a** निष्कारणं ] RBh (< S), निरीक्षणं **A** **67b** प्रति ] **RA**, प्रभो Bh (< S) **67c** ततो ] **RA**, इतो Bh (< S) **67d** स्थिताः ] **RA**, स्थित्वा Bh (< S) • ऽसुरेश्वराः ] RA$_3$A$_4$Bh, ऽसुरेश्वर A$_7$ **68a** जानीमः ] **RA**, जानीम Bh (em.?) • किमिमे ] **A**Bh, किमिदं R **68b** साधवः ] R, साधकाः **A**Bh **68c** वै निभृता ] **A**Bh, च विमना R **68cd** भूत्वा तू॰ ] R, भूतास्तू॰{॰स्तु॰ A$_4$} **A**Bh **68d** महाबलाः ] A$_7$, यथाबलाः RA$_4$Bh (em.?), यथाबला A$_3$ • After this Bh has two pādas (see SP 112.98cd) **69b** स्थिता अ॰ ] RBh (conj.), प्रणम्या॰ **A** **69d** ॰दिति ] **A**Bh, ॰दिह R **70a** तत्र ते॰ ] **A**Bh, ततस्ते॰ R **70ab** ॰तेष्वेवम॰ ] A$_3$A$_7$Bh, ॰तेष्वेव अ॰ R, ॰तेश्वेवम॰ A$_4$ **70c** ॰स्ते ] **A**Bh, ॰श्च R **70d** इदमूचुः ] **RA**, वाक्यान्यूचुः Bh (< S$_2$) **71a** अयं देशो ह्यशुद्धो ऽद्य ] **RA**, न शुद्धोयं गिरेर्देशो Bh (< S) **71b** गच्छामो वयमन्यतः ] **A**, शक्यामो वयमन्यतः R, द्य गच्छामो न्यतो द्विजाः Bh (conj., cf. S) • After this Bh has two pādas (see SP 112.100cd) **71c** भवान्यपि ] A$_4$A$_7^{pc}$Bh (em.?), रुद्रश्चापि R, भगवान्यपि A$_3$ (hypermetrical), रत्नान्यपि A$_7^{ac}$ • गतान्यत्र ] **A**Bh, गतस्तत्र R **71d** भयार्दिता ] A$_3$A$_7^{pc}$Bh, भयावहः R, भयार्दिताः A$_4$A$_7^{ac}$

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

असुरास्ते दुरात्मानो येषामेष क्षयो ध्रुवः।
गतास्ते निधनं सर्वे धर्मं ये नाशयन्त्युत॥ ७२॥
राज्यार्थं प्रयतैः क्रूरैर्न धर्मो नाशितो भवेत्।
नैव ते निधनं सर्वे प्राप्ताः स्युरमरद्विषः॥ ७३॥
स्वराज्यपरिसंतुष्टा भवेयुर्यदि संस्थिताः।
ते ऽपि सर्वेषु लोकेषु बभुः पूज्याः सुरा इव॥ ७४॥
सनत्कुमार उवाच।
अङ्गिरास्तानुवाचेदं न तेषां कामितस्त्विह।
राज्यहेतोः प्रवृत्तानामधर्मः समुपस्थितः॥ ७५॥
उपार्जयति राज्यं वै धर्म एव हि कामितः।
सो ऽधर्मं नैव कुर्वीत स्थैर्यं राज्यस्य किंचन॥ ७६॥
अत्रिरुवाच।
अधर्मे राज्यमिच्छन्ति जयन्ति युधि सर्वदा।
नो प्रियाश्चैव लोकस्य भवन्ति हतजीविनः॥ ७७॥
धार्मिकास्त्वचिरेणैव हत्वा शत्रूनविक्लवाः।
राज्येषु संप्रतिष्ठन्ते तस्माद्धर्मं समाश्रयेत्॥ ७८॥
ये तु राज्यं बलेनैव धर्मं त्यक्त्वाशुभे रताः।
इच्छन्तो ऽपि न तद्राज्यं प्राप्नुवन्ति कदाचन॥ ७९॥
अथ यत्प्राप्यते राज्यं तैस्तु क्रूरेण कर्मणा।
न चिरं तद्भवेत्तेषां विद्विष्टाश्च भवन्त्युत॥ ८०॥
भृगुरुवाच।
धर्म एव पुरा प्रोक्तो ह्यसुराणां भयापहः।
ब्रह्मणा स्वस्तिकामेन न च ते वर्तयन्त्युत॥ ८१॥

---

**72cd–74** ≈ SP 112.101–102

---

**72b** °मेष ] $A_3A_4$Bh, °मेव $RA_7$ • क्षयो ध्रुवः ] **A**Bh, भये स्थिताः R **72c** सर्वे ] $RA_3$Bh, सर्वं $A_4A_7$ **72d** नाशयन्त्युत ] R**A**, नाशयन्नुत Bh (conj.) **73a** प्रयतैः ] **A**, प्रहितैः R, यदि तैः Bh (< S) **73ab** °रैर्न धर्मो नाशितो भवेत् ] **A**Bh, °रैः कथमेतन्न संशयः R **73c–79b** ] om. R **73c** नैव ] **A**, नैवं Bh (< $S_2$) **74a** स्वराज्य° ] Bh (< S), शूराश्च $A_3A_4$, सुराश्च $A_7$ **74d** पूज्याः ] $A_3$Bh, पूज्या $A_4A_7$ **75b** कामितस्त्वि° ] $A_7$, कामितं त्वि° $A_3A_4$, कामिनं त्वि° Bh (conj.?) **75d** समुपस्थितः ] $A_3A_7$, समुस्थितः $A_4$ (unmetrical), ससुपस्थितः Bh (typo) **76b** कामितः ] conj., कामिकः **A**, कामिनः Bh (conj.) **76d** राज्यस्य ] conj., राज्यं च **A**, राज्यं न Bh (conj.) **77a** अधर्मे ] $A_3A_4$Bh, अधर्मै $A_7$ **77d** हत° ] $A_4A_7$, हित° $A_3$Bh **79c** इच्छन्तो ऽपि न ] **A**Bh, इच्छन्तो न च R **79d** प्राप्नुवन्ति ] **A**Bh, न हि यातु R **80b** तैस्तु क्रूरेण ] **A**Bh, तेन च क्रूर° R **80d** विद्विष्टाश्च भवन्त्युत ] **A**Bh, यावदेव समागताः R **81a** एव ] R, एष **A**Bh • प्रोक्तो ] conj., उक्तो R, प्राप्तो **A**Bh **81b** भयापहः ] conj., भयावहः R**A**Bh **81c** स्वस्ति° ] R, सृष्टि° **A**Bh

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

स्वभावेन च ते सर्वे दारुणा वै निसर्गतः।
दारुणाभिजनाश्चैव तत्कर्म समुपाश्रिताः॥ ८२॥
सनत्कुमार उवाच।
असुरान्प्रति तेषां तु कथां कथयतां तदा।
आगाद्धाता विधाता च कृतान्तश्च त्रयः समाः॥ ८३॥
तांस्ते संपूज्य विधिवत्परस्परमतिप्रभाः।
उपविष्टाः शिलास्वेव मुनयो ऽपि च ते त्रयः॥ ८४॥
उपविष्टांश्चर्षयस्तानामान्त्र्य बहुमानतः।
ऊचुः कस्माद्भवन्तो ऽद्य प्रस्थिता लोकचिन्तकाः॥ ८५॥
धातोवाच।
ब्रह्मलोकादपावृत्ता वयमभ्यागता द्विजाः।
ब्रह्मणा समनुज्ञप्ताः कश्यपस्य ततो ऽन्तिकम्॥ ८६॥
भूयो ऽपि मुनयः प्रोचुः किमुक्तः कश्यपो द्विजः।
ततो ऽब्रवीन्मुनीन्धाता कश्यपं तु यदुक्तवान्॥ ८७॥
यत्त्वया ज्ञापितो ब्रह्मन्ब्रह्मा लोकपितामहः।
असुरा अपि मे पुत्रा देवाश्चापि प्रियाः प्रभो॥ ८८॥

**83a–84b** ≈ SP 112.103–104ab **85cd–86** ≈ SP 112.104cd–105 **87cd–88** ≈ SP 112.106–107ab

**82b** वै निसर्गतः ] $A_7$Bh (conj.?), मा विषीदत R, वै विसर्गतः $A_3$, वै विसङ्गतः $A_4$ **82c** °जनाश्चैव ] R, °गमश्चैव **A**, °गमाच्चैव Bh (conj.) **83a** तेषां तु ] **A**Bh, ते गत्वा R **83b** कथां ] R**A**, एवं Bh (< S) • कथयतां तदा ] **A**Bh, कथयितुन्तथा $R^{pc}$, कथयतान्तथा $R^{ac}$ **83c** आगाद् ] Bh (< S), अगाद् R**A** **83d** °श्च त्रयः समाः ] $RA_3A_4$, °श्च प्रषः समाः $A_7$, °श्चेति ते त्रयः Bh (conj.) **84a** तांस्ते ] $A_3A_4$Bh, तांस्तु R, त+त+स्ते $A_7$ (unmetrical) • संपूज्य ] RBh (< S), संगृह्य **A** **84b** °मतिप्रभाः ] R**A**, °मनुव्रताः Bh (< S) **84d** मुनयो ] $RA_3A_4$, मुलयो $A_7$, मनुयो Bh (typo) • च ते त्रयः ] **A**Bh, जितेन्द्रियाः R **85ab** ] om. R **85a** °विष्टांश्चर्षय° ] conj. Bh (silently), °विष्टामृषय° **A** (unmetrical) **85b** °नामन्त्र्य ] **A**, °ननमञ्च Bh (conj.?) **85c** कस्माद् ] R**A**, क्वेदं Bh (< S) **85d** °चिन्तकाः ] R**A**, °धारिणः Bh (< S) **86a** ब्रह्मलोका° ] **A**Bh, ब्रह्मणास° R • °दपावृत्ता ] $RA_3A_7$, °दयावृत्ता $A_4$, °द्ध्युपावृत्य Bh (conj.) **86b** °मभ्यागता ] R**A**, °मद्य गता Bh (< S) **86c** समनुज्ञप्ताः ] $A_3A_7$, स्ताः समाहूय R, समनुज्ञाताः $A_4$, स्म समाज्ञाप्ताः Bh (< S) **86d** कश्यपस्य ततो ] $A_7$Bh (em.?), उपगम्य त्रया° R, कस्यपस्य{°श्य $A_4$} ततो $A_3A_4$ **87b** कश्यपो ] $RA_4A_7^{ac}$Bh (em.?), कश्यपे $A_3A_7^{pc}$ • द्विजः ] $RA_4A_7$Bh (em.?), द्विजाः $A_3$ **87c** ततो ] R**A**, अथा° Bh (< S) • °न्मुनीन्धाता ] **A**Bh, °न्मुनीन्द्रांस्तान् R **87c** कश्यपं तु यदुक्तवान् ] Bh (conj.?, cf. S), कश्यपान् कमलोद्भवः R, कश्य{°स्य° $A_3$}पस्तु यदुक्तवान् **A** **88a** ज्ञापितो ] Bh (< S), कुपितो R, कुशितो $A_3A_4A_7^{ac}$, कथितो $A_7^{pc}$ **88ab** ब्रह्मन्ब्रह्मा लोक° ] RBh (< S), ब्रह्मा ब्रह्मलोके **A** **88cd** असुरा अपि मे पुत्रा देवाश्चापि ] **A**Bh, असुरानपि पुत्रा हि देवस्यास्य R **88d** प्रियाः ] $RA_3$Bh, प्रिया $A_4A_7$

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

तेषां नैव यथान्योन्यं वैरं स्याल्लोकभावन ।
तथा कुरु सुरश्रेष्ठ भवेयं निर्वृतस्ततः ॥ ८९ ॥
तत्राहं ब्रह्मणाज्ञप्तो ब्रवीमि त्वां महामुने ।
देवासुरं यथावृत्तमन्योन्यं सख्यमेव च ।
अमृतोत्पादनं चैव राज्यसंस्थां च कृत्स्नशः ॥ ९० ॥
त्वदर्थं भगवान्सर्वं भविष्यमृषिसत्तम ।
कथयामास लोकेशो देवासुरविचेष्टितम् ॥ ९१ ॥
निवेद्य तस्य तत्सर्वं ब्रह्मणा प्रेषिता वयम् ।
इहागता भगवतीं द्रष्टुं हिमगिरेः सुताम् ॥ ९२ ॥
तानेव देवतान्भूय ऋषयस्ते तपोधनाः ।
पप्रच्छुर्नियतात्मानः सर्व एव तदा मुने ॥ ९३ ॥
देवासुराणां यद्वृत्तं भविष्यं कथितं सुराः ।
तद्वयं श्रोतुमिच्छामो यदि वो ऽनुग्रहे मतिः ॥ ९४ ॥
किं च विज्ञापिता देवी युष्माभिः सुरसत्तमाः ।
कथयध्वं हि तत्सर्वं यद्यनुग्राह्यता हि नः ॥ ९५ ॥

---

**89–95** ≈ SP 112.107cd–113

---

**89a** तेषां नैव ] **A**Bh, तेषामेव R • यथान्योन्यं ] $A_3A_7$Bh, यथाकामं R, यथोन्योन्यं $A_4$ **89b** वैरं स्याल्लोकभावन ] Bh (< S), कामयन्तः परस्परम् R, नैव{◦वं $A_4$} स्या{स्यात् $A_7^{pc}$} लोकभावन **A** **89c** कुरु सुर◦ ] R, कुरु गुरु◦ **A**, कुर्वमर◦ Bh (conj.) **89d** भवेयं निर्वृतस्ततः ] Bh (< S), ततो यं निर्वृतिस्तव R, भवेयुर्निर्वृता{◦र्वृत◦ $A_4$, ◦वृत◦ $A_7^{ac}$, ◦वृता◦ $A_7^{pc}$}स्ततः **A** **90a** तत्राहं ] RBh (< S), पुत्रो हं **A** • ◦ज्ञप्तो ] Bh (em.?, cf. S), कुप्तो R, ◦ज्ञप्ता **A** **90b** महामुने ] Bh (< S), महात्मना R, महात्मने **A** **90c** देवासुरं यथा◦ ] Bh (< S), देवासुर यथा◦ R, देवासुराणां यत्{यं $A_7$} **A** **90cd** ◦त्तमन्योन्यं सख्यमेव च ] $A_3A_4$Bh, ◦त्तमपि पालय सर्व्वदा R, ◦त्तं अन्योन्यं संख्यमेव च $A_7$ **90e** अमृतोत्पादनं चैव ] RBh (< S), अदितिश्च दितिश्चैव{◦श्चै $A_4$(unmetrical)} **A** **90f** राज्यसंस्थां च कृत्स्नशः ] em., ततः संस्कार्य्यं यत्पुनः R, राज्यसंस्था च कृत्स्नशः{◦सः $A_4$} $A_3A_4$, राज्यसंस्था(न){◦व $A_7^{ac}$} कृस्नशः $A_7$, राज्यं संस्थाञ्च कृत्स्नशः Bh (< $S_2$) **91a** त्वदर्थं ] conj., त्वयोक्तं RBh (em.?), त्वयोक्ता **A** • भगवान् ] $R^{ac}$Bh (em.?), भगवन् $R^{pc}$?**A** **91b** भविष्यमृ◦ ] **A**Bh, भविष्यन् ऋ◦ R • ◦सत्तम ] $R^{pc}$**A**Bh, ◦सत्तमः $R^{ac}$ **91cd** ] om. R **92a** निवेद्य तस्य ] RBh (< S), निवेदयतु $A_3A_4$, निवेदयितुं $A_7$ (unmetrical) **92c** ◦गता ] RBh (< S), ◦गतां $A_3A_7$, ◦गतं $A_4$ **92d** द्रष्टुं ] RBh (< S), दृष्टिं $A_3A_4$, दृष्टां $A_7^{pc}$, दुष्टां $A_7^{ac}$ • हिमगिरेः ] **A**Bh, भगवतः R **93a** Before this Bh has सनत्कुमार उवाच। (< S) • तानेव देवतान् ] conj., तामेव देवतां R, तमेव चरतां **A**, तानेवं वादिनो Bh (< S) • भूय ] **A**Bh, भूत्वा R **93b** ◦स्ते ] **A**Bh, ◦श्च R **93c** पप्रच्छुर् ] Bh (< $S_1$), पपृच्छुर् R, पृच्छन्ति **A** **94b** भविष्यं कथितं ] **A**Bh, भविष्यति कथं R • सुराः ] R**A**, शुभाः Bh (< S) **95a** विज्ञापिता ] $RA_7$Bh (< S), विज्ञापितं $A_3A_4$ **95c** हि ] $RA_4A_7$, दि $A_3$, च Bh (< S) **95d** यद्यनुग्राह्यता ] Bh (< S), यद्यनुग्राह्यतां R, यथानुगृह्यता{◦तां $A_7$} **A** • नः ] RBh (< S), वः **A**

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

तेषां तद्वचनं श्रुत्वा ततस्ते सुरसत्तमाः ।
† अथाचष्ट कृतान्तो हि वाक्यं वाक्यविशारदान् † ॥ ९६ ॥
ततः स तेषां बहुचित्रकारणं यथाभविष्यं कथयांचकार ।
सुरासुराणां जयतां च कारणं पुरा विधात्रा विहितं यथार्थवत् ॥ ९७ ॥

इति स्कन्दपुराणे सप्तर्षिसमागमो नामाध्यायः ॥ ११२ - ३ ॥

---

**96–97** ≈ SP 112.114–115

---

**96b** ततस्ते ] $A_4A_7$, तेषान्ते R, तस्ते $A_3$ (unmetrical), त्रयस्ते Bh (< S) • सुर॰ ] R**A**, देव॰ Bh (< S) **96c** अथाचष्ट ] R, तानाचक्षि{॰क्षी $A_7$} **A**, त्वमाचक्ष्व Bh (< S) • कृतान्तो हि ] R**A**, कृतान्तेति Bh (< S) **96d** वाक्यं वाक्यविशारदान् ] R**A**, वाक्यमूचुर्महबलाः Bh (< S) **97cd** ] om. **A** **97c** जयतां च ] conj., जयतश्च R, जगतश्च Bh (< $S_2$) **97d** पुरा ] Bh (< S), सुधा R • विहितं ] Bh (< S), विहिता R **Col.** इति स्कन्दपुराणे रेवाखण्डे सप्तर्षिसमागमो नामाध्यायः R, इति{इति श्री॰ $A_4$, ओं॥ इति श्री॰ $A_7$} स्कन्दपुराणे एकाशीतिसाहस्र्यां संहितायामम्बिकाखण्डे सप्तर्षिसमागमनो{॰गमो $A_3$} नाम द्वादशोत्तरशततमो ध्यायः **A**, इति स्कन्दपुराणे मन्दरारोहणो नाम द्वादशोत्तरशततमो ध्यायः Bh (cf. $S_1$)

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
via free access

# Bibliography

# &

# Indexes

Peter Bisschop and Yuko Yokochi - 978-90-04-46103-1
Downloaded from Brill.com10/21/2022 08:40:34AM
